**पाठ्यक्रमः-Syllabus**

# राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

## विद्यावारिधिप्रवेशपरीक्षायाः पाठ्यक्रमः

**बहुविकल्पात्मकप्रश्नाः (MCQ) 50** **पूर्णाङ्काः – 50**

| क्रम. सं. | शास्त्रम्/विषयः | पाठ्यक्रमः |
|---|---|---|
| 01. | **मीमांसा** | अर्थसङ्ग्रहः<br>न्यायप्रकाशः |

# आदर्शप्रश्नपत्रम्

(अत्र प्रश्नपत्रस्य प्रारूपं प्रदत्तम्। प्रवेशपरीक्षायां भवद्भ्यः प्रदत्तात् पाठ्यक्रमादेव प्रश्नाः भवेयुः।)

# राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

## विद्यावारिधिः

**शास्त्रम् – मीमांसा** **पूर्णाङ्काः- 50**

१.अर्थसङ्ग्रहः इत्यत्र अर्थपदस्य कोऽर्थः ?

अ)धनम् आ) प्रयोजनम्

इ)फलम् ई) मीमांसासिद्धान्तः

२. आद्यसूत्रे अथशब्दार्थः कः ?

अ)आरम्भः आ) मङ्गलम्

इ)प्रश्नः ई) आनन्तर्यम्

३. चोदनाशब्दार्थः कः ?

अ)वेदः आ) विधिः

इ)अर्थवादः ई) धर्मः

४. यजेत इत्यत्र कति अंशाः सन्ति ?

अ)१ आ) २

इ) ३ ई) ४

५. वेदः कतिधा विभक्तः ?

अ)३ आ)४

इ)५ ई) न विभक्तः

६. वाक्यं नाम किम् ?

अ)तिङ्सुबन्तचयः आ) शब्दसमूहः

इ) तिङन्तम् ई) पदसमभिव्याहारः

७. स्थानापेक्षया दुर्बलं प्रमाणं किम् ?

अ)श्रुतिः आ) समाख्या

इ)प्रकरणम् ई) लिङ्गम्

८. “ वषट्कर्तुः प्रथमभक्षः “ इत्यत्र किं विधीयते ?

अ)प्राथम्यं आ) भक्षणम्

इ)प्राथम्यविशिष्टभक्षणम् ई) किमपि न , अर्थवादवाक्यमिदम्

९. अधः दत्तान् विषयान् अर्थसङ्ग्रहक्रमेण योजयत।

अ)काम्यकर्मस्वधिकारः , नित्यकर्मसधिकारः, नैमित्तिककर्मस्वधिकारः

आ) नित्यकर्मस्वधिकारः, काम्यकर्मस्वधिकारः , नैमित्तिककर्मस्वधिकारः

इ) नैमित्तिककर्मस्वधिकारः , नित्यकर्मस्वधिकारः, काम्यकर्मस्वधिकारः

ई) नित्यकर्मस्वधिकारः, काम्यकर्मस्वधिकारः, नैमित्तिककर्मस्वधिकारः

१०. प्रकरणं कस्य विनियोजकम् ?

अ)द्रव्यस्य आ) देवतायाः

इ)कर्तुः ई) क्रियायाः

११. भावनायां करणाकाङ्क्षा इत्यस्य कः अर्थः ?

अ)क्रियासिद्धौ प्रकृष्टोपकारकस्याकाङ्क्षा आ) जनकाकाङ्क्षा

इ) उत्पादकाकाङ्क्षा ई) भावनाभाव्यनिर्वर्तकाकाङ्क्षा

१२. कर्ता कथं लभ्यः ?

अ) आख्यातवाच्यः आ) आक्षेपलभ्यः

इ)कर्तृपदात् ई) उक्तप्रकारत्रयेणापि

१३. कतिदिनसाध्यः ज्योतिष्टोमयागः ?

अ)३ आ) ४

इ)५ ई) ६

१४. चित्रायागस्य विधिवाक्यं किम् ?

अ)चित्रया यजेत पशुकामः आ) दधि मधु पयो घृतम्.....इति वाक्यम्

इ)उभयमपि ई) उभयमपि न

१५. ’ साऽस्य देवता ’ इत्यत्र “अस्य” इति पदार्थः कः ?

अ) सूक्तहविषी आ) द्रव्यदेवते

इ) स्वसमभिव्याहृतं यत्किञ्चित् ई) द्रव्यकर्मणी

१६. तत्प्रख्यशास्त्रम्

अ)विधिरेव आ) अर्थवादः एव

इ)वेदवाक्यम् ई) विधिरर्थवादो वा

१७. प्रयाजादीनां दर्शपूर्णमासाङ्गत्वे प्रमाणम्

अ)महाप्रकरणम् आ) अवान्तरप्रकरणम्

इ)प्रकरणम् ई) सन्दंशः

१८. न कलञ्जं भक्षयेदित्यत्र नञ्पदस्य कुत्र अन्वयः ?

अ)कलञ्जपदे आ) भक्षणे

इ)धात्वर्थे ई) आख्यातार्थे

१९. मीमांसाशास्त्रस्य धर्मशास्त्रस्य च कः भेदः ?

अ)नास्ति भेदः आ) मीमांसाशास्त्रे श्रुतिविचारः , धर्मशास्त्रे स्मृतिविचारः

इ)मीमांसाशास्त्रस्यैव अपरं नाम ई) धर्मशास्त्रे श्रुतिविचारः , मीमांसाशास्त्रे स्मृतिविचारः

२०. विदेवनादयः धर्माः कस्य सन्निधौ पठिताः ?

अ)राजसूयसन्निधौ आ) अभिषेचनीयसन्निधौ

इ)दर्शपूर्णमाससन्निधौ ई) ज्योतिष्टोमसन्निधौ

**एवं पाठ्यक्रमानुगुणम् 50 प्रश्नाः भवेयुः ।**

---------------------